ॐ॥ श्रीगुरुभ्यो नमः॥ सकामरप्रणतमौलिमणिप्रताणा मुद्योतकंदलितपापत
मोवितानं सम्यक्प्रणम्य जिनपादयुगं युगादा वालंबनं भवजलेपततां जनानां
१ यः संस्तुतः सकलवांङ्मयतत्त्वबोधा दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः स्तोत्रैर्जग
त्त्रितयचित्तहरैरुदारैः स्तोष्ये किलाहमपि तं प्रथमं जिनेंद्रं २ बुध्या विनापि विबुधा
र्चितपादपीठ स्तोतुं समुद्यतमतिर्विगतत्रपोहं बालं विहायजलसंस्थितमिंदुबिं
बमन्यः कइच्छति जनः सहसाग्रहीतुं प्रत्यक्षं गुणान्गुणसमुद्रशशांककांतान् क
स्तेक्षमः सुरगुरुप्रतिमोपिबुद्धा कल्पांतकालपवनोद्धतनक्रचक्रं को वातरिक्षमल
मंबुनिधिं भुजाभ्यां सोहं तथापितवलक्षिवशान्मुनीश कर्तुस्तवं विगतशक्तिरपि प्र
वृत्तः प्रीत्यात्मवीर्यमविचार्यमृगोमृगेंद्रं नाभ्येतिकिं निजशिशोःपरिपालनार्थं १ अल्प
श्रुतं श्रुतवतां परिहासधाम त्वद्भक्तिरेवमुखरीकुरुतेबलान्मां यत्कोकिलः किलमधौ
मधुरं विरौति तच्चारुचामरकलिकानकरैकहेतु द्वत्संस्तवेनभवसंततिसं
निबद्धं पापंक्षणात्क्षयमुपैतिशरीरभाजां आक्रांतलोकमलिनीलमशेषमाशु सूर्यां
शुभिन्नमिवशार्वरमंधकारं १ मत्वेतिनाथतवसंस्तवनंमयेद मारभ्यतेतनुधिया
पितवप्रभावात् चेतोहरिष्यतिसतांनलिनीदलेषु मुक्ताफलद्युतिमुपैतिननूदबिंदुः
द त्थास्तांतवस्तवनमस्तसमस्तदोषं त्वत्संकथापिजगतांदुरितानिहंति दूरेसहस्रकि
रणःकुरुतेप्रभैव पद्माकरेषुजलजानिविकाशभाजि १० नात्यद्भुतं भुवनभूषण
भूतनाथ भूतैर्गुणैर्भुविभवंतमभिष्टुवंतः तुल्याभवंतिभवतोननुतेनकिंवा भूत्याश्रि
तंयइहनात्मसमंकरोति १० दृष्ट्वाभवंतमनिमेषविलोकनीयं नान्यत्रतोषमुपयाति
जनस्यचक्षुः पीत्वापयःशशिकरद्युतिदुग्धसिंधोः क्षारंजलंजलनिधेरशितुंकइच्छेत्
१२ यैःशांतरागरुचिभिःपरमाणुभिस्त्वं निर्मापितस्त्रिभुवनैकललामभूत तावंतएवखलु
तेप्यणवःपृथिव्यां यत्तेसमानमपरंन हिरूपमस्ति १२ वक्त्रंक्वतेसुरनरोरगनेत्रहारि
निःशेषनिर्जितजगत्त्रितयोपमानं बिंबंकलंकमलिनंक्वनिशाकरस्य यद्वासरेभवति
पांडुपलाशकल्पं १३ संपूर्णमंडलशशांककलाकलाप शुभ्रागुणास्त्रिभुवनंतव ल
घयंति येसंश्रितास्त्रिजगदीश्वरनाथमेकं कस्तान्निवारयतिसंचरतोयथेष्टं १४ चित्रं

किमत्रयद्दितेत्रिदशगानाति नीतंमनागपिमनोनविकारमार्ग कल्पांतका
लमरुतांचलितांचलेन किंमंदराद्रिशिखरंचलितंकदाचित् १५ निर्धूमव
र्तिरपवर्जितातिखर कृत्स्नजगत्त्रयमिदंप्रकटीकरोषि गम्योनजातुमरु
तांचलितांचलानां दीपोपरस्त्वमसिनाथजगत्त्रयस्य १६ नास्तंकदाचिद
पयासिनराहुगम्यः स्पष्टीकरोषिसहसायुगपज्जगंति नांभोधरोदरनिरु
द्धमहाप्रभावः सूर्यातिशायिमहिमासिमुनींद्रलोके १७ नित्योदयंदलितमो
हमहांधकारं गम्यंनराहुवदनस्यनवारिदानां विभ्राजतेतवमुखाब्जमनल्प
कांति विद्योतयज्जगदपूर्वशशांकबिंबं १८ किंसर्वरीषु शशिनाह्नि विवस्व
तावा युष्मन्मुखेंदुदलितेषुतमस्सुनाथ निष्पन्नशालिवनशालिनिजीवलोके
कार्यंकियज्जलधरैर्जलभारनम्रैः १९ ज्ञानंयथात्वयिविभातिकृतावकाशं
नैवंतथाहरिहरादिषुनायकेषु तेजःस्फुरन्मणिषुयातियथामहत्वं नैवं
तुकाचशकलेकिरणाकुलेपि २० मन्येवरंहरिहरादयएवदृष्टा दृष्टेषुयेषु

ह्रदयंत्वयितोषमेति किंवीक्षितेनभवताभुवियेननान्यः कश्चिन्मनोहरतिनाथहवांत
रेपि २१ स्त्रीणांशतानिशतशोजनयंतिपुत्रान् नान्यासुतंत्वदुपमंजननीप्रसूता स
×दि× वीश्रोदधतिसानिसहस्ररश्मिं प्राच्येवदिग्जनयतिस्फुरदंशुजालं २२ त्वामामनंतिमु
नयःपरमंपुमांस मादित्यवर्णममलंतमसः परस्तात् त्वामेवसम्यगुपलभ्यजयंतिमृ
त्युं नान्यःशिवःशिवपदस्यमुनींद्रपंथा २३ त्वामव्ययंविभुमचिंत्यमसंख्यमाद्यं ब्रह्माणं
मीश्वरमनंतमनंगकेतुं योगीश्वरंविदितयोगमनेकमेकं ज्ञानंस्वरूपममलंप्रवदं
तिसंतः २४ बुद्धस्त्वमेवविबुधार्चितबुद्धिबोधा त्वंशंकरोसिभुवनत्रयशंकरत्वात् धा
तासिधीरशिवमार्गविधेर्विधानात् व्यक्तंत्वमेवभगवान्पुरुषोत्तमोसि २५ तुभ्यंन
मस्त्रिभुवनार्तिहराय नाथ तुभ्यंनमःक्षितितलामलभूषणाय तुभ्यंनमस्त्रिजगतः
परमेश्वराय तुभ्यंनमोजिनभवोदधिशोषणाय २६ कोविस्मयोत्रयदिनामगुणैरशे
षैस्त्वंसंश्रितोनिरवकाशतयामुनीश दोषैरुपात्तविबुधाश्रयजातगर्वैः स्वप्नांतरेपि
नकदाचिदपीक्षितोसि २७ उच्चैरशोकतरुसंश्रितमुन्मयूख माभातिरूपममलंभव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वतोनितांतं स्पष्टोल्लसत्किरणमस्ततमोवितानं बिंबंरवेरिवपयोधरपार्श्ववर्ति २८
सिंहासनेमणिमयूखशिखाविचित्रे विस्फाजतेतववपुःकनकावदातं बिंबंवियद्विलसदंशुलतावितानं तुंगोदयाद्रिशिरसीवसहस्ररश्मेः २९ कुंदावदातचलचामरचारुशोभं विस्फाजतेतववपुःकलधौतकांतं उद्यच्छशांकशुचिनिर्झरवारिधार मुच्चैस्तटंसुरगिरेरिवशातकौंभं ३० छत्रत्रयंतवविभातिशशांककांत मुच्चैःस्थितस्थगितभानुकरप्रतापं मुक्ताफलप्रकरजालविवृद्धशोभं प्रख्यापयत्त्रिजगतःपरमेश्वरत्वं ३१ उन्निद्रहेमनवपंकजपुंजकांती पर्युल्लसन्नखमयूखशिखाभिरामौ पादौपदानितवयत्रविधेयतःपद्मानितत्रविबुधाःपरिकल्पयंति ३२ इत्थंयथातववविभुतिरभूज्जिनेंद्र धर्मोपदेशनविधौनतथापरस्य यादृक्प्रभादिनकृतःप्रहतांधकार तादृक्कुतोग्रहगणस्यविकाशिनोपि ३३ श्चोतन्मदाविलविलोलकपोलमूल मत्तभ्रमद्भ्रमरनादविवृद्धकोपं ऐरावतांत्यमितमुद्धतमापतंतं दृष्ट्वा ३४
दृष्ट्वा सयंत्रभवतिनोभवदाश्रितानां स्वल्पिनस्तकुंभगलदुज्ज्वलशोणिताक्त मुक्ता

फलप्रकरदूषितभूमिभागः बद्धक्रमःक्रमगतंहरिणाधिपोपि नाक्रामतिक्रमयुगा चलसंश्रितंतात ३५ कल्पांतकालपवनोद्धतवह्निकल्पं दावानलंज्वलितमुज्ज्वलमु ज्जिहिंसुमिवसंमुखमापतंतं त्वन्नामकीर्तनजलंशमयत्यशेषं ३६ र क्तेक्षणंसमदकोकिलकंठनीलं क्रोधोद्धतंफणिनमुत्फणमापतंतं आक्रामतिक्रमयु गेननीरसशंकः त्वन्नामनागदमनीहृदियस्यपुंसः ३७ वल्गत्तुरंगगजगर्जितभीम नाद माजौबलंबलवतामपिभूपतीनां उद्यद्दिवाकरमयूखशिखापविद्धं त्वत्कीर्तनात्तम इवाशुभिदामुपैति ३८ कुंताग्रभिन्नगजशोणितवारिवाह वेगावतारतरणातुरयो धभीमे युद्धेजयंविजितदुर्जयजेयपक्षा स्त्वत्पादपंकजवनाश्रयिणोलभंते ३९ अंभो निधौक्षुभितभीषणनक्रचक्र पाठीनपीठभयदोल्बणवाडवाग्नौ रंगत्तरंगशिखरस्थि तयानपात्रा स्त्रासंविहायभवतःस्मरणाद्व्रजंति ४० उद्भूतभीषणजलोदरभारभुग्नाः शोच्यांदशामुपगताश्चुतजीविताशाः त्वत्पादपंकजरजोमृतदिग्धदेहा मर्त्यामवंति मकरध्वजतुल्यरूपाः ४१ आपादकंठमुरुशृंखलवेष्टितागा गाढंबृहन्निगडको टिनिघृष्टजंघाः त्वन्नाममंत्रमनिशंमनुजाःस्मरंतः सद्यस्वयंविगतबंधभया भव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वेति ध२ मत्तद्विपेंद्रमृगराजदवानलादि संग्रामवारिधिमहोदरबंधनोत्थं तस्याशु
नाशमुपयाति तयं स्तिचेतवयमावकंस्तवमिमंमतिमानधीते ध३ स्तोत्रस्वजंतव
जिनेंद्रगुणैर्निबद्धां स्तक्तामयाकृचिरवर्णविचित्रपुष्पां धत्तेजनोयइहकंठगता
मजस्रं संमानतुंगमवशासमुयेतिलक्ष्मी ध४ इतिश्री भक्तामरस्तोत्रंसंमाप्त॥

॥ॐ॥ नवसगहरं यासंयासी वंदामिकमघमुकं विसहरवीयनिनासं मंगलकल्याणआवासं
वसीहरफूलंगमंतोकंठेधारजोसयामणोतसगहरोगमारी दुट्ठजखंतिनवसामेइ
चिंतियदूरिमंतोउफयणामोविबकूकलोल्लेइ नरतिरिएणसवेजीवा यावंतिनहुसदो
हगेउयसमंतेलद्धोचिंतामणिकयायविन्नुइ यावंतिअवघेणं जीवाइरामरंगणी इ
हसंवोमायसन्नतिसूरनीसरेणहियणी तादिवदेव दिनबोधीसवेसवेयासजिणचंदय
इतिनवसगहरंसंपूर्णं॥१७